यमः चण्डालपतितामेध्यैः कुणपैः कुष्टिना तथा। ब्रह्मप्रसूतिकोदक्याकौलेयककुटुम्बिभिः। दृष्टं वा केशकीटाक्तं भस्मकनकाम्बुभिः शुद्धमद्यात् सहृल्लेखं प्रभूतं व्युष्टमेव च ब्रह्मपु०। कौलेयकः कुक्कुरः कुटुम्बी कुक्कुटादि प्राणिभेदः तस्य बहुकुटुम्बवत्त्वात्। व्युष्टं पर्य्युषितम्। एतच्च चुरतरमभ्युक्ष्य भक्ष्यम् अत्यन्तोपहतस्य तु त्यज्यतैव” प्रा०वि० “विशुद्धमपि चाहारं मक्षिकाक्रमिजन्तुभिः। केशलोमनखैर्वापि दूषितं परिवर्ज्जयेत्” देव०। तन्मात्रमुद्धृतं शुद्ध्येत् कठिनन्तु पयोदधि। “अविलीनं तथा चैव विलीनं ञ्रपणेन तु” शाता० “नाश्रोत्रियतते यज्ञे ग्रामयाजिहुते तथा। स्त्रिया क्लीवेन च हुते भुञ्जीत ब्राह्मणः क्वचित्। अश्लीलमेतत् साधूनां यत्र जुह्वत्यमी हविः प्रतीपमेतद्देवानां तस्मात्तत् परिवर्ज्जयेदिति” मनुः। “अश्रोत्रियोऽनधीतवेदः तेन हुतयज्ञे अन्नमभक्ष्यम्। ग्रामयाजी ग्रामजनानां श्राद्धपूजाकारयिता ऋत्विग्भावेन होमस्वस्त्ययनकर्त्ता च स च होता यत्र यज्ञे तदन्नमभक्ष्यम्। श्राद्धविशेषान्नस्याभक्ष्यता “चान्द्रायणं नवश्राद्धे पराको मासिके मतः। पक्षश्राद्धेऽतिकृच्छ्रः स्यात् षाण्मासे कृच्छ्र एव च। आब्दिके कृच्छ्रपादः स्यादेकाहः पुनराब्दिके” अङ्गिः०। पक्षश्राद्धं त्रैपक्षिकश्राद्धम्। नवश्राद्धमेकादशाहादिश्राद्धम्। हस्तादिदत्त द्रव्यविशेषस्याभक्ष्यता। “हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते च किल्विषम्। तस्माद्व्यान्तरितं देयं पर्णेनाथ तृणेन वा। प्रदद्यान्न तु हस्तेन नायसेन कदाचन। आयसेन तु पात्रेण यदन्नन्तु प्रदीयते। भोक्ता विष्ठासमं भुङ्क्ते दाता च नरकं व्रजेत्” भवि०पु०। “माक्षिकं फाणितं शाकं गोरसं लवणं घृतम्। हस्तदत्तानि भुक्त्वा च भोक्ता सान्तपनञ्चरेत्” यमः। “एकेन पाणिना दत्तं शूद्रादत्तं न भक्षयेत्। घृतं तैलञ्च लवणं पानीयं पायसं तथा” स्मृतिः। “वागदुष्टं भावदुष्टञ्च भाजने भावदूषिते भुक्त्वान्नं ब्राह्मणः पश्चात् त्रिरात्रं तु व्रती भवेत्” शङ्खः। शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने। अहोरात्रोषितोभूत्वा पञ्चगव्येन शुध्यति” संव०। भिन्नभाजनं कांस्यपरं “भिन्नकांस्ये तु योऽश्नीयादन्नं स्नात्वा जपन् द्विजः। गायत्र्यष्टसहस्रं तु एकभक्तस्ततः शुचिः” बौधा० कांस्यत्वेन विशेषणात्। आपोशनाकरणे भोजनस्य निषेधात् तदकृतवता द्रव्यमात्रस्याभक्ष्यता। “आपोशानमकृत्वा तु भुङ्क्ते योऽनापदि द्विजः। भुञ्जानस्य यदा ब्रूयात् गायत्र्यष्टशतं जपेत्”। अनाचान्तस्य द्रव्यमात्रस्याभक्ष्यता। “अनाचान्तः पिबेद्यस्तु भक्षयेद्वापि किञ्चन। गायत्र्यष्टसहस्रं तु जप्यं कृत्वा विशुध्यति। आचामेच्चर्व्वणे नित्यं मुक्त्वा ताम्बूलचर्वणम् दन्तलग्ने फलमूले भुक्तस्नेहे तथैव च। ताम्बूले चेक्षुदण्डे च नोच्छिष्टो भवति द्विजः” जावा०। “कषायकटुताम्बूले भुक्तस्नेहानुलेपने। मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत्” लघुबौ० अनाचान्तः कषायकटुताम्बूलेक्षुव्यतिरिक्तद्रव्यं सकृद्भक्षयित्वा दुग्धमधुनारिकेलजलादिकञ्च सकृत् पीत्वा अष्टोत्तरसहस्राष्टसां गायत्रीं जपेत् प्रा०वि०। यज्ञोपवीतरहितानामन्नमात्रस्याभक्ष्यता। “विना यज्ञोपवीतेन भुङ्क्ते तु ब्राह्मणो यदि। स्नानं कृत्वा जपं कृत्वा उपवासेन शुध्यति” लघुहा०। अमेध्यदूषितफलानामभक्ष्यता। “द्वारि कुसुमादींश्च फलकन्देक्षुमूलकान्। विण्मूत्रदूषितान् प्राश्य कृच्छ्रं तु पादतश्चरेत् सन्निकृष्टेऽर्द्धमेव स्यात्” संव०। मृदादेरभक्ष्यता। “अङ्गुल्या दन्तकाष्ठञ्च प्रत्यक्षलवणं तथा। मृत्तिकाभक्षणञ्चैव तुल्यं गोमांसभक्षणैः भवि०पु०। अत्रापवादः। सैन्धवं लवणञ्चैव यच्च सामुद्रिकं भवेत् पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्यशः” वायुपु०। “भुक्त्वा तु क्षारलवणं त्रिरात्रं तु वने वसेत्” यमः। “मृल्लोष्ट्रखादने अहोरात्रमभोजनाच्छुद्धिः श्रा०त०रघु०। “नैकोमिष्टान्नमश्नीयात् वञ्चयित्वा गृही सुतान्। दारान् भृत्यातिथींश्चैव तथासम्बन्धिबान्धवान् इत्युपक्रम्य “लालापे नरके घोरे दुर्गन्धे प्राप्यते नरः” यमः। “पयोऽनुद्धृतसारञ्च भक्षयेद्दधि नो निशि दिवसे नवनीतञ्चेति” “सर्वं तिलमयं नाद्यात् सायं शर्म्माभिलाषिभिः” इति। “नाश्नीयात् सन्ध्ययोर्द्वयोः” इति च का०ख०। “नातिसौहित्यमाचरेत् नातिप्रगे नातिसायम् न निशीथे नचोषसि” मनुः न दध्युद्धृतसारञ्च भक्षयेद्दधि नो निशि। नाद्यादाढ्यम्नि रात्रिषु” काशी०ख० “श्राद्धं कृत्वा परश्राद्धे योऽश्नीयात् ज्ञानवर्ज्जितः। दातुः श्राद्धफलं नास्ति भोक्ता किल्विषभुग् भवेत्” यत् वेष्टितशिरा भुङ्क्ते यत् भुङ्क्ते दक्षिणामुखः सोपानात्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते, इति का०ख०। “यो गृहीत्वा विवहाग्निं गृहस्थ इव मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः” का०ख०। “पक्षे वा यदि मासे यस्य गेहेऽश्ति न द्विजः। भुक्त्वा दुरात्मनस्तस्य चरेच्चान्द्रायणं व्रतम्” का०ख० “अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम्” लि०त०पु०। “यातुधानाः